**मुख्यवार्ता:**

- **राष्ट्रपतिः द्रौपदी मुर्मूः अवदत्- भारतं विश्वस्मिन् लोकतंत्रस्य जीवितम् उदाहरणं जातम्, शीघ्रमेव अर्थव्यवस्थायाः तृतीयः बृहत्तमः देशः भाव्यमानोस्ति।**
- **विदेशमन्त्री डॉ0 एस जयशंकरः अद्यारभ्य मालदीवस्य त्रिदिवसीय आधिकारिकयात्रायां भविष्यति।**
- **सर्वोच्च न्यायालयेन अद्य दिल्ल्याः पूर्वोपमुख्यमन्त्रिणे मनीष सिसौदिया इत्यस्मै दिल्ली-उत्पाद-शुल्क-नीति-सम्बद्धप्रकरणे तं विरूद्धं ख्यापितं निरस्तीकृत्य मुक्तिः प्रदत्ता।**
- **पेरिस-ओलम्पिकिति क्रीडाकुम्भे अद्य भारतीयः मल्लयोद्धा अमन-सेहरावतः पुरूषाणां सप्तपञ्चाशत् किलोग्रामवर्गस्य मल्लयुद्धक्रीडायां चैपडे-मार्स-एरेना इत्यत्र क्रीडिष्यति।**

**राष्ट्रपतिः द्रौपदी मुर्मूः**

राष्ट्रपतिः द्रौपदी मुर्मूः अवदत्- भारतं विश्वस्मिन् लोकतंत्रस्य जीवितम् उदाहरणं जातम्, शीघ्रमेव अर्थव्यवस्थायाः तृतीयः बृहत्तमः देशः भाव्यमानोस्ति। अद्य आक्लैण्ड्-नगरे आयोजिते सामुदायिक-स्वागत-समारोहे राष्ट्रपतिः द्रौपदी मुर्मूः भारतीय-प्रवासिनः सम्बोधितवती । अस्मिन् अवसरे राष्ट्रपतिः अवदत् यत् भारतं विश्वस्मिन् सजीवलोकतन्त्रस्य उदाहरणं जातम्, शीघ्रमेव तृतीया बृहत्तमा अर्थव्यवस्था भवति अत्र। स्वागतसमारोहे भारतसर्वकारस्य राज्यमन्त्री जार्ज कुरियनः, लोकसभासांसदः जुगलकिशोरशर्मा, सौमित्रखानः, उच्चायुक्ता नीताभूषणः, बहवः भारतीयप्रवासिनः च उपस्थिताः आसन्। द्रौपदी मुर्मु प्रवासिनः भारतीयान् स्वीय सम्बोधने उक्तवती यत् न्यूजीलैण्ड देशस्य समीपे भारतस्य विकासदिशि विशेषतया शिक्षायाः क्षेत्र योगदानस्य विशेषज्ञताः अनुभवाश्च वर्तन्ते। सा अस्मिन विषये हर्षं प्रकटितवती यत् न्यूजीलैण्डदेशे वसन्तः भारतीयाः दीपावली-ओणम्-होली-पोंगल-पर्वाणि सहर्षं सोल्लासं आमानयन्ति।

**प्रधानमन्त्री-वियतनामः**

विदेशमन्त्री डा. एस्. जयशङ्करः अद्य अवदत् यत् अद्यावधिः भारतीयानां नागरिकाणां एक नवतिः प्रसंगाः सन्ति ये रूस-सेनायां नियुक्ताः सन्ति । लोकसभायां प्रश्नोत्तरकाले पूरकानाम् प्रश्नानां उत्तरं दत्वा डा. जयशङ्करः प्रोक्तवान् यत् तेषु अष्टजनाः दुर्भाग्येण मृताः, चतुर्दश जनेभ्यः च अवकाशः प्रदत्तः । भारतम् एतत् विषयं अतीव गम्भीरतया चिन्तयति इति विदेशमन्त्री अवधानं दत्तवान्। असौ अवोचत् यत् अनेन रूसदेशीयेन विदेशमन्त्रिणा सह अनेकवारम् अयं विषयः उत्थापितः । डा. जयशङ्करः अवदत् यत् समस्या एषा अस्ति यत् एते भारतीयाः नागरिकाः रूस-सेनायाः सेवायां अनुबन्धनम् स्वीकृतवन्तः इति रूसदेशीयाः अधिकारिणः मन्यन्ते। कृतकार्यस्य विषये मन्त्री सूचितवान् यत् सी. बी. आई .केन्द्रीय अन्वेषणः प्रभागः इत्यनेन नव दश जनानां संस्थानां च विरुद्धम् आपराधिकप्रकरणं पञ्जीकृतम् अस्ति इति।

**लोकसभायाः राज्यसभायाः**

लोकसभायाः राज्यसभायाः च अनुसूचितजाति -अनुसूचितजनजाति वर्गाणां भाजपादलीयाः सांसदाः अद्य संसत्-भवने प्रधानमन्त्रिणा नरेन्द्रमोदिना सह मिलितवन्तः । अनुसूचितजाति -अनुसूचितजनजाति इत्येतयोः कृते नवोन्नतवर्गविषयं सर्वोच्चन्यायालयस्य निरीक्षणस्य विषये सांसदाः संयुक्तरूपेण स्मारकं प्रेषितवन्तः। सभायाः अनन्तरं वार्तहरैः सह वार्तालापं कुर्वन् भाजपा-पक्षस्य सांसदः भोला सिङ्घः अवदत् यत् अयं निर्णयः न प्रवर्तनीयः इति ते आग्रहम् अकुर्वन् । सः अवदत् यत् प्रधानमन्त्री तान् आश्वासितवान् यत् एतत् केवलं सर्वोच्चन्यायालयस्य निरीक्षणम् एव अस्ति इति।

**सिसोदिया-मुक्तिः**

सर्वोच्च न्यायालयेन अद्य दिल्ल्याः पूर्वोपमुख्यमन्त्रिणे मनीष सिसौदिया इत्यस्मै दिल्ली-उत्पाद-शुल्क-नीति-सम्बद्धप्रकरणे तं विरूद्धं ख्यापितं निरस्तीकृत्य मुक्तिः प्रदत्ता। न्यायाधीशयोः बी.आर्. गवई-के.वी. विश्वनाथन-इत्यनयोः एकेन पीठेन केन्द्रीयान्वेषण विभाग-प्रवर्तननिदेशालययोः ख्यापित-प्रसङ्गेषु सिसोदियाद्वारा याचितयाचिकायै अनुमतिः प्रदत्ता। न्यायालयेन समुदीरितं यत् सिसोदियाइत्यमुं याचित प्रकरणस्य समाप्तेः अनन्तरं असीमित समयं यावत् कारावासे स्थापनेन अनुच्छेदस्य एकविंशति इत्येतस्य अन्तर्गतं व्यक्तिगतस्वतन्त्रतायाः मौलिक-अधिकाराणां गंभीरतया उल्लङ्घनं भविष्यति। न्यायालयेन सिसोदियाइत्यस्मै दशलक्षरूप्यकाणां याचिकाराशये अपि च पारपत्रस्य प्रपन्नाय कथितमस्ति । अवधेयं वर्तते यत् विगतवर्षे फरवरी मासस्य षड्विंशे दिनाङ्के भ्रष्टाचार-निवारण अधिनियमान्तर्गतं केन्द्रीयान्वेषण विभागेन सिसोदियाः निगडितः ।

**भाजपा हर घर तिरङ्ग**

राष्ट्रव्यापिन: प्रत्येकं गृहं त्रिरङ्ग: (हर घर तिरङ्गा) इति अभियानस्य अंशे भारतीय-जनता-पार्टीति दलं अगस्तमासस्य एकादश दिनाङ्कत: त्रयोदश-दिनाङ्कं यावत् प्रत्येकं विधानसभा-निर्वाचन-क्षेत्रे त्रिरङ्ग-यात्रा-कार्यक्रमस्य आयोजनं करिष्यति। भाजपा-दलस्य राष्ट्रिय: महासचिव: तरूण-चुघ: एकस्मिन् वक्तव्ये उक्तवान् यत् अगस्तमासस्य द्वादशात् चतुर्दश दिनाङ्कं यावत् सर्वेभ्य: स्वतंत्रता सेनानीभ्य: एवम् देशस्य सर्वेषु युद्ध-स्मारकेषु पुष्पचक्राणि पुष्पाञ्जलयश्च अर्पिष्यन्ते।

**विदेशमन्त्री एस जयशंकर**

विदेशमन्त्री डॉ0 एस जयशंकर: अद्यारभ्य मालद्वीवस्य त्रिदिवसीय आधिकारिकयात्रायां भविष्यति। यात्राया: उद्देश्यं अस्ति द्वयो: देशयोर्मध्ये सुदृढं द्विपक्षीय-सम्बन्धवर्धनम्। अवधेयं यत् मालद्वीव: भारतस्य प्रमुख: समुद्रीय प्रतिवेशी वर्तते।

**बांग्लादेश**

केन्द्र-प्रशासनेन भारत-बाग्लादेश-सीम्नि समसामयिकीं परिस्थितिं निरीक्षितुमेका समिति: निर्मिता। एषा समिति बांग्लादेशे समकक्षैभि: अधिकारिभि: सह संवादं साधयिष्यति।

**पीएम-चोपडा**

प्रधानमन्त्री नरेन्द्र मोदी कुन्तकक्षेपकाय नीरज-चोपडा अमुष्मै वर्धापनानि प्रदत्तवान्। असौ पेरिस-ओलम्पिक-चतुर्विंशत्युत्तर द्विसहस्र स्पर्धायां रजत-पदकं विजितवान।

**इजरायल**

पश्चिम-एशियायां गंभीररूपेण संघर्ष: प्रवर्तते। अत: अस्राइल देश: उच्च-संचेतनां प्रति वर्तते। प्रधानमन्त्री बेंजामिन नेतन्याहू: विश्वासं प्रकटितवान् यत् देश: आत्मरक्षया सह प्रत्युत्तरे आक्रमणाय सम्बद्धो अस्ति।

**ऋतुविज्ञान विभाग:**

भारत-ऋतु विज्ञान-विभागेन आगामिन: सप्तदिनानि यावत् देशस्य विभिन्नेषु भागेषु अतिवृष्टे: सम्भावना अभिव्यक्ता । विभागानुसारि सप्ताहपर्यन्तं पूर्वोत्तरीय-पश्चिमी-उप-हिमालय क्षेत्रेषु विद्युत्प्रकाशनेन: ध्वनिना च सह महती वृष्टि: भविष्यति। विभागेन इदमपि पूर्वानुमानितं यत् देशस्य पूर्वीयभागा: अपि आगामिषु त्रिषु चतुर्षु च दिवसेषु तद्वदेव महतीवृष्टे: साम्मुख्यं करिष्यन्ति।

**पेरिसोल्मिकक्रीडाकुम्भ:**

पेरिस-ओलम्पिकिति क्रीडाकुम्भे अद्य भारतीय: मल्लयोद्धा अमन-सेहरावत: पुरूषाणां सप्तपञ्चाशत् किलोग्रामवर्गस्य मल्लयुद्धक्रीडायां चैपडे-मार्स-एरेना इत्यत्र क्रीडिष्यति। अमन: सम्प्रति कांस्यपदकाय डेरियनक्रूजइत्यनेन साकं स्पर्धां करिष्यति।

**।। इति वार्ता:।।**